1206

SKRIT UNIVERSITY

ಪುಸ್ತಕ ಸಂಖ್ಯೆ C-1206



कापिलसूत्रम् ।

श्रीपरमहंसाचार्य्यमाधवपरिव्राजकेन

विदितम् ।

श्रीयुक्त नवचन्द्रशिरोमणिना परिशोधितम् ।

श्रीभुवनचन्द्रवसाकेन प्रकाशितम् ।

(८ नं० निमतलाघाट ष्ट्रीट्)

कलिकातानगरे

१६ नं० नूतन पगयापटी

नारायणयन्त्रे

मुद्रितम् ।

ईंराजो १८८० सन १२८६ साल।

प्रकाशक—श्रीभुवनचन्द्र वसाक।
(८ नं० निमतलाघाट ष्ट्रीट्)

प्रिण्टर—श्रीरामनारायण पाल।
(१६ नं० नूतन पगयापटी)

कापिलसूत्रम्।



अथातस्तत्त्वे समासः ॥ १ ॥

अचिन्त्यमव्यक्तमनादिमव्ययं जगन्निदानं परमाक्षरं विभुम्।
प्रणम्य वाचा मनसा च कायकैर्विनिर्ममे कापिलसूत्रवृत्तिकाम्॥

इह खलु जगति निखिलचेतनावतां जन्तूनां सुखं भूयाद् दुःखं मे माभूदिति सुखोत्पत्तौ दुःखहानौ च बलवतीच्छा जायते। न हि कदाचिद् दुःखाभावमन्तरेण सुखोत्पत्तिः सम्भवति सुखदुःखयोर्विरुद्धधर्मत्वात्। तमःप्रकाशनयोरिव तयोः कदापि एकाधिकरणे समावेशोऽस्तीति भावः। अस्मिन्ननादिसंसारे सदैव दुःखबाहुल्यं दृश्यते। यद्यपीह दुःखं न भवेत् तदा कस्तन्निराकरणोपायं कुर्य्यात्। परन्तु त्रिविधदुःखनिवारणे अवश्यं यत्नः कर्त्तव्यः। तापत्रयनिवृत्तेरेव परमपुरुषार्थत्वात्। शास्त्रज्ञानमेव तापत्रयनिवृत्युपायः नान्यदुपायान्तरं किमप्यस्तीति। यतः प्रारीप्सितशास्त्रप्रतिपादितज्ञानमेव विवेककारणम्। इति मनसि विचारयन् भगवान् पञ्चशिखाचार्य्यः स्वाध्यायोऽध्ययनीय इत्यध्ययनविधिना साङ्गवेदादिस्वाध्यायमधीत्य प्रकृतितो विविक्तात्म आत्मा इति चरमफलदात्वेन संगृह्य नारायणावतारम् ऋषिप्रवरं कपिलमुपाजगाम। ततः सदसद्विचारविमलचेताः कपिलोऽनेन द्वाविंशतिसंख्यकसूत्रेण अज्ञाननिराकरणद्वारा हेयं प्रतिपादयिषन् शिष्यपरिबोधार्थं संक्षेपतः शास्त्रारम्भं प्रतिज्ञातवान्। त्रिविधदुःखस्यात्यन्तनिवृत्तेरेव परमपुरुषार्थतया षड़ाध्याया-

त्मकसाङ्ख्यशास्त्रस्य न पौनरुक्तापत्तिः समाधिपारदर्शिनः कपिलस्यैवात्र ईषज्ज्ञांषतत्वात् । प्रतिज्ञातमुज्ज्ञावयन् शास्त्रार्थमुपदिशति अथेति । यद्यपि अथ स्यान्मङ्गले प्रश्ने कार्य्यारम्भेष्वनन्तरे। अधिकारे प्रतिज्ञायामन्वादेशादिषु क्वचिदित्यादिना अथ शब्दस्यार्थबाहुल्यं दृश्यते तथाप्यन्येषामर्थानामत्रानुपयोगित्वादथशब्दस्याधिकारार्थ एव गृह्यते । ग्रन्थारम्भे ग्रन्थसमाप्तिप्रतिबन्धकीभूतदूरदृष्टनाशपूर्वकनिर्विघ्नं ग्रन्थसमाप्तये मङ्गलाचरणस्यावश्यकत्वमुक्तम् । न हि मङ्गलाचरणमन्तरेण ग्रन्थस्य परिसमाप्तिर्भवतीति चेदथशब्दोच्चारणमात्रेणैव विघ्नव्यूहनिवारकेण मङ्गलाचरणं प्रतीयते । एतेन शिष्टाचारः प्रतिपालितो भवति । यथेह कर्म्मचितोऽपि लोकः क्षीयते । एवमेवामुत्र पुण्यचितोऽपि लोकः क्षीयते इत्यादिश्रुत्या कर्म्मफलस्यानित्यत्वं प्रतीयते । यतः कर्म्मफलस्यानित्यत्वम् अतस्तत्वपर्य्यालोचनैव प्रकृतफलप्रदा स्यादिति सुतरामेव तत्त्वानुसन्धानं विधेयमिति ॥ १ ॥

कथयामि अष्टौ प्रकृतयः ॥ २ ॥

तत्त्वं व्याकुर्वन् सूत्रमवतारयति कथयामीति । कथयामीति वाक्यच्छेदः । अष्टौ प्रकृतीः कथयामीति तात्पर्य्यम् । प्रकृतेः कोऽर्थः कतमा प्रकृतिः कतिविधा सा इति संशयं परिजिहीर्षन् वदति । प्रकरोतीति प्रकृतिर्जगत्प्रसविनीत्यर्थः । सा प्रकृति द्विविधा, विशुद्धा विमिश्रा च । गुणानां सत्त्वरजस्तमसां साम्यावस्थया जगतः कारणभूतमव्यक्तं प्रधानं शुद्धा पुनरेषां वैषम्यावस्थया महत्तत्त्वाहङ्कारपञ्चतन्मात्राणीति सप्तप्रकृतिविकृतिभूतानीति विमिश्रा । एका शुद्धा सप्त विमिश्राः एता अष्टौ प्रकृतयः । तथाहि प्रकृतेर्महत्तत्त्वं जायते मह-

त्तत्त्वादहङ्कारः अहङ्कारात् पञ्चतन्मात्राणि जायन्ते। बुद्धिविशेष एव महत्तत्त्वम् अहं करोमीति व्यवहारोऽहङ्कारः। पञ्चतन्मात्राणि तु रूपरसगन्धस्पर्शविशेषाणि सूक्ष्मभूतानि। ननु कथमिदमुच्यते अचेतनायाः प्रकृतेर्जगदुत्पत्तिः घटोत्पत्ताविव चेतनकर्त्तारं विना न ह्युत्पत्तिरस्तिः सत्यमेतत्। केवलाचेतनस्यापि शक्तिर्दृश्यते। यथा अचेतनमपि दुग्धं वत्सानां वृद्धिं करोति पुनरचेतनाद् गोमयादेः कीटादयो जायन्ते। यदि पुनरुच्यते गोमये दुग्धे च गोमाद्यशरीरस्याधिष्ठानादेव सचेतनत्वं तेनैव तयोः शक्तिः स्वीक्रियते इति। नैतत् साधूक्तं भवद्भिः। गोमाद्यशरीरयोश्चेतनावत्त्वेऽपि ताभ्यां परित्यक्तयोर्गोमयक्षीरयोः कुतश्चेतनत्वप्रतीतिः। वस्तुतस्तु यथा चेतनासंयुक्तस्यायस्कान्तस्य सन्निधिमात्रेण लौहानां स्पन्दनशक्तिर्दृश्यते तथा सर्वत्रापि चेतनसंसर्गादेव अचेतनानां चेतनत्वं प्रतीयते इति मन्तव्यम् ॥ २ ॥

षोड़शस्तु विकारः ॥ ३ ॥

प्रकृतिं कथयित्वा विकारान् कथयितुं सूत्रमवतारयति षोड़शेति। क्षित्यप्तेजोवायुराकाशानि भूतानि पञ्च, वाक्पाणिपादपायूपस्थात्मकानि कर्मेन्द्रियाणि पञ्च, चक्षुः कर्ण नासिका जिह्वात्वगात्मकानि ज्ञानेन्द्रियाणि पञ्च मनश्च एष षोड़शसंख्यको विकारः। पञ्चतन्मात्रवत् पृथिव्यादीनामुभयात्मकत्वात् घटाद्युपादानभूतानां भूम्यादीनां विकारता सिध्यति। नापि क्षीरस्य विकारो दधि दध्नो विकारो नवनीतं तद्विकारो दौर्गन्ध्यमित्याद्यनवस्थाप्रसक्तेः। वस्तुतस्तु घटपटादीनि न पृथिव्याद्यतिरिक्तानि। वाचारम्भणं विकारो मृत्तिकेत्येव सत्यमित्यादि श्रुतेः ॥ ३ ॥

पुरुषः ॥ ४ ॥

यथा अचेतनस्य रथादेरश्वसंयोगात् गतिस्तथा सर्वत्र चेतनसम्बन्धेन सचेतनत्वोपलब्धिरित्याह पुरुष इति। पुरीशयनात् पुरुष इत्युच्यते। शरीरमेव पुरी, पुरुषसंयोगेनैव सर्वं चेतनावद्विभाति। स एव भोक्ता निर्लेपोऽप्रसवधर्मी नित्यश्च। अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः ईशानो भूतभव्यस्य अशब्दमस्पर्शमरूपमव्ययमित्यादिश्रुतेः। किमत्र पुरुष एक एव बहवो वा। नाद्यः पुरुषस्यैकत्वे एकस्मिन् पुरुषे मृते सर्व एव म्रियेरन् सुतरामेव सृष्टिलोपापत्तिः स्यात्। ननु तथापि एकत्वमेव पुरुषस्य स्यात् घटाकाशमठाकाशवदौपाधिकभेदेन बहुत्वमिति। तथा सति पुरुषस्यौपाधिकत्वेऽभ्युपगम्यमाने कालेन संसारलोपापत्तिः प्रसज्येत। तत्त्वज्ञानेनोपाधिविनाशे मोक्षाभावश्रवणात् अद्वद्विमद्वस्तुनः कदाचिदवस्थितिर्न सम्भवति। यथा निरन्तरवितरणशीलस्य अचिरेणैव कालेन अपरिमितधनराशीनामायहीनानां समूलोच्छेदो भवति तद्वत् सृष्टिनाशः सम्भवेत्। नैतद् युक्तियुक्तं मातापित्रभ्यामुत्पन्नस्य पुत्रदेहस्य मातापित्रोरंशभूतत्वेन तच्छरीराधिष्ठितपुरुषयोरंशः पुत्रादौ केन वार्य्यते। यथा उपादानभूतात् तन्त्वादे रक्तपीतसंयोगिनः पटो रक्तः पटः पीत इति तद्वत् स्वमानजातीयचैतन्यं कार्य्येष्ववगम्यते कलेरंशश्च संयत्ने भुवि दुर्य्योधनो नृप। इति महाभारते आत्मा वै जायते पुत्र इत्यादि श्रुतेश्च। अनेन मातापित्रोरंशभूतानाञ्च निखिलपुरुषाणां मध्ये केचित् संसरन्ति केचिन्मुच्यते। तत्र सम्प्रदायविदां रुचितम्। न द्वितीयः सुखदुःखजन्ममरणादीनां नानात्वात् वर्णाश्रमादिधर्म्माणाञ्च बहुत्वात् पुरुषस्य बहुत्वम्। अस्मिन्

पत्तेऽपि जगतो विनाश इति न वाच्यं पुरुषाणामनन्तत्वेऽपि विरोधात्। सांख्याचार्य्याः एतानि पञ्चविंशतितत्त्वानि मन्यन्ते। यद्येवं पुरुष आदिमान् कथं न स्यात् सत्यमनन्तवासनावशेन कुलालचक्रवत् घटीयन्त्रवच्च असकृज्जन्ममरणप्रतिपाद्यश्रुत्यनवकाशात्। संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणञ्चोत्तरञ्च तदवेहि वै तदिष्टापूर्त्तेः कृत इत्युपासते। ते चान्द्रमसमेव लोकमभिनयन्ते त एव पुनरावर्त्तन्ते ते ऋषयः प्रजाकामाः दक्षिणं प्रतिपाद्यन्ते। एष भूमैव रयि पितृयान अथोत्तरेण तपसा ब्रह्मचर्य्येण श्रद्धया विद्यया ज्ञानमन्विष्यादित्यभिजायन्ते इत्यादि श्रुतिभ्यः॥ ४॥

त्रैगुण्यम्॥ ५॥

इतःपूर्वं पञ्चविंशतितत्त्वानि निरूप्य इदानीमवान्तरगुणा निरूप्यन्ते। सत्त्वरजस्तमांसीति त्रयोगुणास्तेषां भावस्त्रैगुण्यं सत्त्वरजस्तमसां परस्परगुणप्रधानभावं विहाय सामान्येन स्वरूपेणावस्थानं जायते। अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां स्वरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः। इत्यादिश्रुतिविहितत्वात्। एतैरुपादानभूतैः सुखदुःखाद्यात्मकैर्गुणैः सह निःसङ्गस्य चेतनावतः पुरुषस्य प्रदीपतमसोरिव सम्बन्धोऽस्ति सन्निधिमात्रत्वात्। कथमिदमुक्तं निरवयवे जगदुपादानभूते गुणानां सम्बन्धः सम्भवेदिति न कदापि निरवयवे आकाशादौ गुणसम्बन्धो दृश्यते लोके उत्पलादावयविनि नीलादयो गुणा दृश्यन्ते। सत्यं वैदिकस्य सर्वशक्तिमत्त्वात् लौकिकवदलौकिकवेदावबोधस्य शक्तिर्न विद्यते इत्येवमिदानीं वर्ण्यते। पक्षान्तरे निरवयवेषु लौकिकेषु परमाण्वादिषु यदि शुक्लादयो गुणाः

स्वीक्रियन्ते तदा सर्वशक्तिमतो जगत्कारणस्य दूषणं भूषणमेव स्यात् ॥ ५ ॥

सञ्चरः प्रतिसञ्चरः ॥ ६ ॥

प्रकृतेः सत्त्वादिगुणानामुत्पत्तिमुक्त्वा तेषां धर्मान् विवक्षुः सूत्रमवतारयति। सञ्चरः उत्पत्तिः प्रतिसञ्चरः प्रलयः। अष्टाभ्यः प्रकृतिभ्य उत्पत्तिस्तासु प्रलयं श्रूयते। यतः प्रकृतेर्महान्, महतोऽहङ्कारः अहङ्कारात् पञ्चतन्मात्राणि जायन्ते एवं पञ्चतन्मात्राणि अहङ्कारे अहङ्कारो महति महान् प्रकृतौ विलीयते इति। कूर्मो यथा स्वदेहं क्वचित् प्रसरति कदाचिदाकुञ्चयति अथवोर्णलाभः सूत्रं स्वयमेव वहिर्निःसारयति अन्तराक्रामति च तथा अनुलोमविलोमेन प्रकृत्यादयो जायन्ते प्रविलीयन्ते च। इति ॥ ६ ॥

अध्यात्ममधिभूतमधिदैवञ्च ॥ ७ ॥

प्रकृत्यादीनां धर्म्मानुक्त्वा इदानीं सांख्यानुमन्यमानानां प्रकृत्यादिपदार्थानां सुखदुःखात्मकतया तत्स्वरूपमाह। चतुर्विधप्राणिजातं जगत् तापत्रयासंयुक्तं न ज्ञातव्यं त्रैविध्याश्रयादिति। त्रैविध्यं किन्तावदत्रोच्यते अध्यात्ममधिभूमधिदैवञ्चेति त्रैविध्यम्। आत्मनि शरीरे चित्ते वा अधिव्याप्य वर्त्तते इति अध्यात्मं तच्च शारीरं मानसञ्चेति द्विविधं वायुपित्तकफानां वैषम्यात् शारीरं कामक्रोधलोभमोहभीति विषादैर्मनोरथानामप्राप्तिनिमित्तं मानसम्। एतत् सर्वमेवाध्यात्मदुःखं ज्ञातव्यं आन्तरिकत्वात्। भूतमधिकृत्य वर्त्तमानं यत्तदधिभूतं तच्च पशुपक्षिसर्पादिस्थावरनिमित्तम्। दैवं लक्षीकृत्य अधिदैवं तदेव विनायकग्रहराक्षसयक्षाद्यावेशनिमित्तम्। एवं-

विधैर्दुःखैः प्रकृतेर्विकाराणाञ्च तादात्म्यमिति भावः। एतेषां दुःखत्रयाणां विनाशे बहवः सुखोपायाः सन्ति। तथाहि शारीरदुःखस्य उपशमनार्थं वैद्यनिकरैरौषधिरसायनः सुखोपायः कृतः मानसिकस्यापि दुःखस्य निराकृतये सुरम्यहर्म्यकामिन्यपूर्वभोजनालङ्कारादिः सुगमो हेतुर्विद्यते। एवं विविधाधिभौतिकदुःखस्य प्रतीकारे नीतिशास्त्राभ्यासपटुतारूपं कारणमस्ति। तथा अधिदैवस्य दुःखस्य उपशमाय मणिमन्त्रप्रयोगो विशिष्टहेतुरस्ति। यद्यप्येवं तथापि न तापत्रयाणामेषामेतैरतिशया निवृत्तिः पुनः पुनरुत्पत्तिसम्भवादिति बोध्यम् ॥ ७ ॥

पञ्चाभिबुद्धयः ॥ ८ ॥

इदानीं बुद्धेः साधारणं धर्म्मं निरूपयिष्यन् सूत्रमवतारयति पञ्चेति। अभिबुध्यन्ते जायन्ते आभिरित्यभिबुद्धयः कियत्यस्ता इत्याशयेन पञ्चाभिबुद्धयो प्रदर्श्यन्ते। त्रिविधमन्तःकरणं बुद्धीन्द्रियं कर्म्मेन्द्रियञ्चेति पञ्च। अन्तःकरणानि तु बुद्ध्यहङ्कारमनांसि। अध्यवसायो बुद्धेर्धर्म्मविशेषः अभिमानस्तु अहङ्कारस्य। सङ्कल्पविकल्पौ मनसः। बुद्धीन्द्रियाणि तु यथासंख्यं दर्शनादिक्रियासाधनानि चक्षुःश्रोत्रत्वग्घ्राणरसनारूपाणि। दर्शनादयोऽपि बुद्धेरवान्तरधर्म्मविशेषाः पञ्चसंख्यकाः सन्ति। कर्म्मेन्द्रियाणि च यथासंख्यं वचनादिक्रियासाधनानि पाक्पाणिपादपायूपस्थात्मकानि पञ्च। साकल्येन त्रयोदशविधं करणमित्यर्थः। अत एव निरन्तरोत्पत्तिविनाशवति अनादि जगति निखिलवस्तुजातस्य विज्ञातव्यत्वेन अभिबुद्धयः शक्याः। केचित्तु अन्तःकरणानां मध्ये मनसोऽनिन्द्रियत्वं वदन्ति तन्न साम्प्रतं सर्वेन्द्रियनियन्त्रा मनसा सह स्वस्वविषयेषु इन्द्रियाणां

तादात्म्यावबोधात्। एतेन बुद्ध्यहङ्कारयोरिन्द्रियत्वं स्फुटीकृतमासीत्। अहं सुखी अहमेव दुःखी इत्यादि प्रत्यक्षसिद्धिः सम्भवेत् ॥ ८ ॥

पञ्च कर्म्मयोनयः ॥ ९ ॥

वासनाया आविष्करणं कुत एवस्यादिति शङ्कां परिहरन् सूत्रमुद्भावयति पञ्चेति। कर्म्मैव योनिः कारणं येषां ते कर्म्मयोनयः वुद्धिवृत्तिविशेषाः। प्राणिनां सुखदुःखयोरुपभोगार्थं क्लिष्टाक्लिष्टभेदेन पञ्चैव कर्म्मयोनयो व्यवह्रीयन्ते इति यावत्। अनया क्लिष्टवृत्त्या संसारानलप्रतप्तो जीवो दुग्धादिकं पिवति अपरतश्चाक्लिष्टवृत्त्या मुमुक्षुः समुत्पन्नविवेकः सन् परमानन्दं सुखमुपभुङ्क्ते। प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयस्ताः पञ्चेति भावः। सांख्यभाष्यकृता श्रीमता विज्ञानाचार्य्येण षड्ध्यायसांख्यभाष्ये प्रपञ्चितमेतदतिविस्तारभिया नात्र प्रपञ्चितमिति ॥ ९ ॥

पञ्च वायवः ॥ १० ॥

इदानीं पञ्चभूतानां मध्ये एकतमस्य वायोः प्रकारभेददर्शनाय सूत्रमवतारयति पञ्चेति। यतः प्रलयोत्पत्तिमतां प्राणिनां विविधावृत्तयः स्युस्ते एते पञ्च वायवो ज्ञातव्या इत्यर्थः। तथाहि प्राणापान समानश्चोदानव्यानौ च वायव इति। प्राणस्य मुखनासाद्यधिष्ठितावृत्तिः। अपानस्य वृत्तिः वृषणपायूपस्थाद्यधिष्ठिता। समानस्य वृत्तिः कण्ठादिसमाश्रिता। उदानस्य वायोर्वृत्तिस्तु हृन्नाभिसर्वसन्ध्याधिष्ठिता। व्यानस्य वृत्तिस्तु त्वगाद्यधिष्ठिता। नन्वत्र वायुरेव सर्वक्रियासाधनश्चेतनश्चञ्चलश्च सन् समस्तं प्राणिजातं प्रेरयति किं पुनरेत-

दतिरिक्तः सचेतनः पुरुषः स्वीक्रियते सत्यं नात्र कश्चिद्विवादः श्रुतौ प्राणाद्यतिरिक्तपुरुष प्रसिद्धेः। तथाच श्रुतिः असङ्गोऽयं पुरुष इति। अपि वा प्राण एव यदि चेतनस्तदा सुषुप्तिप्राप्तस्य पुरुषस्य प्राणानुत्क्रमणस्य सुषुप्तिकाले प्राणस्य विद्यमानत्वेनापि जाग्रत्काले प्रत्यक्ष इव तत्र घटपटादयोऽप्यवगम्यन्ते। प्रकृतेऽपि सुषुप्तिकाले न घटपटादिवाह्यपदार्थावगतिः सम्भवति। करणोपरमात् यथा गृहस्वामी एकं द्वौवारिकं द्वाररक्षणे नियोज्य सपरिवारो वहिर्गच्छति। तथा पुरुषो देहमध्ये प्राणमात्रं स्थापयित्वा आनन्देन विश्राम्यन्तीति भावः॥ १०॥

पञ्च कर्म्मात्मानः॥ ११॥

प्रकृतेर्गुणानुक्त्वा कर्म्मनिवर्त्तकं निरूपयति पञ्चेति। आत्मा कर्म्माणां निवर्त्तक इति यावत्। कर्म्मणां आत्मानः पञ्च ज्ञातव्याः। एता यमाभ्याससमाधिप्रज्ञा उत्पद्यन्ते एतएव पुरुषाणां निखिलाः क्रिया निवर्त्तन्ते। क्रमेण यमादीनाह, के ते यमादयः, अहिंसासत्यमस्तेयब्रह्मचर्य्यापरिग्रहाणां यमसंज्ञा कथ्यते। निरन्तरदीर्घकालसद्विषययत्नोऽभ्यासः। परत्रेह भोगविरागो वैराग्यम्। मनस एकाग्रता समाधिः। सत्त्वपुरुषान्यथाज्ञानं प्रज्ञा। एतत् पातञ्जले व्यासदेवेन प्रपञ्चितमिति॥ ११॥

पञ्च पर्वा अविद्याः॥ १२॥

इदानीं पञ्चानामविद्यानामवान्तरभेदनिरूपणार्थं सूत्रमवतारयति पञ्चेति। पर्वशब्दोऽत्र ग्रन्थिवाचकः। ग्रन्थिविशिष्टाः पञ्च अविद्याः स्युरित्यर्थः। रज्जुग्रन्थेर्दृढ़त्वात् यथा त्वां

सहसा मोक्तुं पुरुषो न शक्नोति तथा संसारग्रन्थेरातिशय्यतया तस्याः परिमोचनं दुष्करमिति भावः। मदास्मिता रागद्वेषाभिनिवेशाः पञ्च अविद्याः ता यथाक्रमं तमोमोहमहामोहतामिस्रान्धतामिस्रसंज्ञाः पञ्च अविद्याः स्युः। अनात्मन्यात्मज्ञानात् ब्राह्मणोऽहमिति वृत्तिरूपोमदः। अस्मिताहि अभिमानरूपा। बहुतरं धनं मे भूयादिति वृत्तिरूपोरागः। विनाशित्वादिदं मे नेष्टमिति द्वेषः। जन्ममरणरूपा वृत्तिरभिनिवेशः। तमःप्रभृतीनां पृथग्विधोभेदो द्रष्टव्यः। यथा मोहतमसोरष्टविधो भेदः दशविधो महामोहस्य तामिस्रान्धतामिस्रयोरपि षट्त्रिंशद्विधा भेदा वक्ष्यन्ते। एताः पञ्च अविद्या एव जीवानां बन्धकारकाः स्युरित्यर्थः॥ १२॥

अष्टाविंशतिधा अशक्तिः॥ १३॥

पञ्च अविद्याभेदानुक्त्वा इदानीं अष्टाविंशतिशक्तिं दर्शयति अष्टेति। धाप्रत्ययोऽत्र प्रकारार्थे अष्टाविंशतिप्रकारा शक्तिरित्यवगम्यते। इन्द्रियाणां व्यावातात् एकादशेन्द्रियाणां एकादशधा व्याघाता एकादशधा अशक्तिः यथा श्रोत्रस्य वधिरता नेत्रस्यान्धता नासिकाया अघ्राणता त्वचं कुण्ठता, रसनाया जड़ता वाक्यस्य मूकता हस्तस्य विकारता पादस्य खञ्जता गुह्यस्योदावर्त्तता उपस्थस्य क्लीवता मनसो मत्तता एता एकादशविधा अशक्तयो वर्त्तन्ते। एवं तुष्टिसिद्धीनां सप्तदशधेति समष्ट्या अष्टादशधा अशक्तयो विद्यन्ते तुष्टिसिद्धी स्वयमेव वक्ष्यति॥ १३॥

नवधा तुष्टिः॥ १४॥

इदानीं तुष्टिभेदं दर्शयति नवधेति। तुष्टिर्द्विविधा आध्या-

त्मिका वाह्याश्च। आध्यात्मिकाश्चतस्रः वाह्याश्च पञ्च समष्टि-रूपेण नवधा तुष्टिरित्यर्थः। आध्यात्मिकाश्चतस्रो यथा प्रकृत्युपादानकालभाग्याख्याः प्रकृतिरेव विवेक साक्षात्कारं हि परिणामभेदं करोति। अहन्तु पूर्णः ध्यानादिना इत्यात्मचिन्तनतो येयं शिष्यस्य तुष्टिरन्त उत्यते। यतः प्रव्रज्यायां प्रकृतिमात्रत्वात् नास्तिविवेकः सा तुष्टिरलं ध्यानादिना अत्रोपदेशेन या तुष्टिर्भवति सोपादानाख्या सलिलमिति कथ्यते। बहुकालमपेक्ष्य समाधिना प्रव्रज्या भविष्यतीति व्यर्थं तव चपलतया इत्युपदेशे या तुष्टिर्भवेत् सा कालाख्या तुष्टिरिति मेघ उच्यते। भाग्यवशादेव निर्विकल्पकसमाधौ या तुष्टिर्भवेत् सा भाग्याख्या तुष्टिरित्युच्यते वृष्टिः। प्रकृतिमहदहङ्कारपञ्चतन्मात्रस्थूलभूतेषु आत्मत्वेनाभिमन्यमानस्य पञ्च वाह्यास्तुष्टयो जायन्ते। अर्जनरक्षणनाशेपभोगे हिंसानां विषयाणासुपरमात् याः पञ्च तुष्टयो भवन्ति ता एव यथाक्रमं पारं सुपारं पारपारं अनुत्तमाम्भः उत्तमाम्भः संज्ञकाः स्युः। ये जना वाह्यां तुष्टिमालभ्य हर्षिताः स्युर्न ते तत्वदर्शिनः उपार्जितानामर्थानां बहुदुःखसाध्यतया तत्र तत्वज्ञानाभावात्। तथाहि अर्थानामर्जने क्लेशस्तथैव परिरक्षणे। भोगे दुःखं व्यये दुःखं हिंसायां दुःखमेव वा इति समख्या नवधा तुष्टिर्भवतीति स्थितम्॥ १४॥

अष्टधा सिद्धिः॥ १५॥

इदानीं पूर्वोक्तानामविपरीतानां सिद्धीनां अवान्तरभेदं दर्शयन् सूत्रमवतारयति अष्टेति। पुनरष्टधा सिद्धिः केति विशेषेण निर्दिश्यते। सा हिद्विधा मुख्यास्तिस्रः गौण्यः पञ्च

साकल्येनाष्टधा सिद्धिरुदाहृता। प्रमोदा मुदिता मोदनेति मुख्यास्तिस्रः अध्ययनं शब्द ऊह खजनप्राप्तिर्दानञ्चेति पञ्च गौण्यः। तथाहि यदधिदैवस्य दुःखस्यापनयनं कृत्वा ज्ञानमुत्पद्यते सा प्रमोदना नाम सिद्धिः। यदधिभूतस्य दुःखस्य सेवादिना तिरोधानं कृत्वा ज्ञानमुत्पन्नं सा मुदिता सिद्धिः यदाध्यात्मिकस्य दुःखस्यापनयनानन्तरं ज्ञानं जायते सा मोदना नाम सिद्धिरुच्यते। सद्गुरोः सकाशाद्विधिवदात्मविद्योपदेशोऽध्ययनं गुरूपदेशमन्तरेण पूर्वाभ्यासवशात् यत् तत्त्वस्य निरूपणं सा सिद्धिरूहेति कथ्यते। खजनसान्निध्यवशात् य आनन्दः प्राप्यते सैव सुहृत्प्राप्तिर्नाम सिद्धिरुदिता। नितान्तनिष्पापचित्तेन विधिवत् यद्दानं तद्दानसिद्धिरुच्यते। गौणमुख्यभेदेनाष्टसिद्धयो निरूप्यन्ते ॥ १५ ॥

दश मूलिकार्थाः ॥ १६ ॥

सम्प्रति पञ्चविंशतितत्त्वेषु धर्म्मान् विभजयन् सूत्रमवतारयति दशेति। एते वक्ष्यमाणाः मूलिका मूलीभूता दश अर्था विषया ज्ञातव्या इत्यर्थः। एतेषां पञ्चविंशतितत्त्वानां मध्ये प्रत्येकं यथा सम्भवमेते दशविषयास्तिष्ठन्तीति भावः। के ते विषयाः कुत्र वा तिष्ठन्ति इत्याशयेनाह। प्रधानमधिकृत्य एकत्वमर्थवत्त्वपारार्थ्यञ्चेति। पुरुषमधिकृत्य अन्यता बहुविधत्वसकर्त्तृत्वञ्चेति। उभयमधिकृत्य संयोगवियोगावस्तित्वञ्चोक्तमिति। त एवार्थाः स्थूलसूक्ष्मशरीरमपेक्ष्य तिष्ठन्तीति यावत्। भोजवार्त्तिकेऽप्युक्तं प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता। पारार्थ्यञ्च तथानैक्यवियोगो योग्य एव च। शेषवृत्तिरकर्त्तृत्वं मौलिकार्थाः स्मृता दश। इति ॥ १६ ॥

अनुग्रहः सर्गः ॥ १७ ॥

प्राक् पञ्चविंशतितत्त्वानां धर्मानुक्त्वा सृष्टिप्रकारं निरूपयन् सूत्रमारभते अनुग्रह इति। सहार्थेऽत्रानुशब्दः प्रयुक्तस्तथाच अनुगृह्णातीत्यनुग्रहः स च उत्पत्तिरिति कथ्यते। स च द्विविधो निरूपितः। वासनारूपं सूक्ष्मशरीररूपञ्चेति। उभयोरविनाभावात् ज्ञातुं शक्यते। न हि वासनाव्यतिरेकेण लिङ्गशरीरस्य विद्यमानता सम्भवति। तथा लिङ्गशरीराभावेऽपि वासनाया अस्तित्वं विद्यते। यथा बीजाङ्कुर इति। ननु बुद्ध्यादिपदार्थानामेतेषामनादित्वात् सर्गो द्विविधः कथं स्यादिति मन्यते। सत्यं परन्तु बुद्ध्यादीनामनादित्वेऽपि वीचितरङ्गन्यायेन आविर्भावतिरोभावरूपः सर्ग इति। आविर्भावतिरोभावौ च सर्गप्रलयौ सूचयति ॥ १७ ॥

चतुर्दशविदो भूतसर्गः ॥ १८ ॥

प्राक् साधारणतः सर्गं निरूप्येदानीं व्यष्टिरूपेण सर्गं निरूपयिष्यन् सूत्रमवतारयति चतुर्दशेति। निखिलभूतानामेव चतुर्दशविधः सर्गो विज्ञातव्य इत्यर्थः। यतो वासनावशेन सत्त्वरजस्तमसां वैषम्यावस्थायां सर्वे प्राणिनः स्वेदजाण्डजोद्भिज्जजरायुजरूपेण आविर्भवन्ति। अवान्तरभेदेन स एव सर्गस्त्रिधो भिद्यते यथा दैवो मानुषस्तिर्य्यक्योनयश्चेति दैवः सर्गोऽष्टविधः। मानुषः सर्ग एकविधः तिर्य्यक्योनयः पञ्चविधाः भवन्ति एतेषां प्रकारभेदमाह। ब्राह्मप्राजापत्यैन्द्रगान्धर्वयाक्षराक्षसासुरपैशाचा इत्यष्टधा दैवः सर्गः। एकविध एव मानुषः सर्गः। तिर्य्यक् योनयश्च पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधाः सर्गा दृश्यन्ते। ननु कथमत्र चतुर्दशविधो भूतसर्ग इति कथ्यते। घटादिभूतसर्गावलोकनात् बहव

एव सर्गाः सम्भवन्ति। न हि पञ्चभूतातिरिक्तानामुत्पत्तिमतामनवगमात् सर्वत्राप्येवमूहनीयमिति ॥ १८ ॥

त्रिविधो बन्धः ॥ १९ ॥

यद्येवं स्यात् न हि प्रागुक्तानामेतेषां पदार्थानां ज्ञानमन्तरेण बन्धनिवृत्तिः सम्भवति तस्यानादित्वादतस्तत्स्वरूपनिरूपणार्थं सूत्रमवतारयति त्रिविध इति। उपाधिनिमित्तो मिथ्या ज्ञानकल्पित एव बन्धः न स पारमार्थिक इति। बन्धस्य त्रैविध्यमाह प्राकृतिको वैकारिको दाक्षिणकश्चेति त्रिविधा बन्धा वेदितव्या इत्यर्थः। क्रमेणैतान् विवृणोति ये तु अष्टासु प्रकृतिषु परमार्थतत्त्वं मन्यमानाः समाधिना यासुपासते तेषां तासु लयः प्राकृतिको बन्ध उच्यते। ये तु विकारेष्विन्द्रियादिचैतन्यं समर्थयन्तस्तान्ये वोपासते तेषामिन्द्रियलयो वैकारिकलयः कथ्यते। ये पुनः संसारविमुग्धचेतसः केवलं दक्षिणायनकर्म्मकलापं मन्यमानाः अश्वमेधादिरेव पुरुषार्थो नान्य इति मन्यन्ते कर्म्मफलान्यश्नन्ति तेषां दाक्षिणको बन्धः कथितः प्रतिनियतजन्ममरणानुरागत्वात् दाक्षिणको बन्धः चक्रवत् वर्त्तते। तथाहि श्रुतिः योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयान्ति यथा कर्म्म यथा श्रुतम् इति। त्रिविध बन्ध एव संसारमूलं स एव भूतान् संसारावर्त्ते न्यपातयदिति। अनेन त्रिविधबन्धेनैव जीवाः संसारावर्त्ते पुनः पुनरावर्त्तन्ते। यावद् बन्धनिवृत्तिर्न स्यात्तावन्मोक्षो न भवेदिति ॥ १९ ॥

त्रिविधो मोक्षः ॥ २० ॥

बन्धस्यानादित्वेऽपि प्रयत्नेन तन्निरासः कर्त्तव्य इति मनसि निधाय सूत्रमवतारयति। त्रिविध इति प्राणिनां पुण्यपापाप-

चयावलोपेन त्रिविधो मोक्षः प्रवर्त्तते। तमेव विशेषेणाह क्रममोक्षो विदेहकैवल्यं स्वरूपप्रतिष्ठा चेति त्रिविधो मोक्षो वेदितव्यः इत्यर्थः। विषयाशक्तचेतसस्तत्त्वानुसन्धानं कुर्वतः क्रमशो जन्मान्तरे यो मोक्षो भवेत् स एव क्रममोक्ष उक्तः। उथाच स्मृतिः बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते इति। सुखदुःखयोः साम्यं मन्यमानस्य विषयविरागिणो यदानन्दलाभः स एव विदेहवैकल्यं निर्दिष्टमिति यावत्। तथाच श्रुतिः—अपाम सोम अमृता अभूम इत्यादि। अनन्तकालं व्याप्य यत् स्वरूपेणावस्थानं स च स्वरूपप्रतिष्ठा उक्ता। श्रुतिरपि न ह वै शरीरस्य प्रियाप्रिययोरपहतिरस्तीत्याह। एते त्रयो मोक्षाः प्राणिनां संसारमोचका भवन्तीति भावः। उक्त मोक्षत्रयेणैव जीवा निवृत्तिमाप्नुवन्ति। ये पुनर्मोक्षभाजस्तेषां न पुनः संसारप्रवृत्तिः॥ २०॥

त्रिविधं प्रमाणलक्षणम्॥ २१॥

प्राक् त्रिविधं मोक्षमुक्त्वा इदानीं प्रमाणलक्षणनिरूपणार्थं सूत्रं पठति त्रिविधेति। प्रमीयते येनेति प्रमाणं प्रमाज्ञानकारणमिति भावः। तत् किन्तावदित्याह दृष्टमनुमानमाप्तवचनञ्चेति। बुद्धिर्यद् यद्वस्तुजातमिन्द्रियद्वारेण चिदात्मरूपेण विषयीकरोति तत् प्रत्यक्षमेव दृष्टं प्रमाणमित्यर्थः। सूर्य्यं पश्ये शब्दं शृणोमि इत्यादि ज्ञानमेव प्रत्यक्षम्। पूर्ववत् शेषवत् सामान्यतो दृष्टञ्चेति त्रिविधमनुमानं कारणेन यच्च कार्य्यमनुमीयते तत् पूर्ववदनुमानं यथा मेघोन्नतिदर्शने वृष्टेरनुमानम्। यत् कार्य्येण कारणानुमानं भवति तत् शेषवदनुमानं यथा घटदर्शने परमाण्वनुमानम्। यदन्यत्र दृष्टस्यान्यत्र दर्शनं तत् सामान्यतो दृष्टमनुमानं भवति। यथा गृहे

दृष्टस्य देवदत्तस्य वहिर्दर्शनेन गमनमनुमीयते। देवयज्ञपतग-मनुष्यवर्णाश्रमादिविभागहेतोः सर्वज्ञानाकरस्य वेदशास्त्रस्य अपौरुषेयतया इदं सदिदमसत् अयं घट इत्यादि द्रव्यव्यवहार-मूलं आप्तवचनम्। त्रिविधेनानेन प्रमाणेन प्रकृतिपुरुषयोः पृथगवगतिः स्यादिति परमपुरुषार्थकारणमुच्यते। अनेन प्रमाणत्रयेण परमात्मसाक्षात्कारो भवति। सुतरामेवैतेषां प्रमाणत्वमुक्तम् ॥ २१ ॥

एतत् सम्यक्ज्ञात्वा कृतकृत्यः स्यात् न पुनस्त्रिविधेन दुःखेनानुभूयते ॥ २२ ॥

इति कापिलसूत्रं समाप्तम्।

प्रकृत्यादिपदार्थानुक्त्वा इदानीं तदवबोधेन मुक्तिं साधयितुं संक्षेपेण सूत्रं पठति एतदिति। एतत् पूर्वोक्तपदार्थानां साधर्म्यं ज्ञात्वा कृतकृत्यः स्यात् मोक्षं लभते इत्यर्थः। यः पूर्वोक्त-पदार्थं ज्ञात्वा कृतकृत्यो भवेत् स न चाध्यात्मिकाधिदैविकाधि-भौतिकेति त्रिविधदुःखेनाभिभूतो भवतीति भावः। तेषा-मत्यन्तलयेन पुनरुत्पत्त्यभावादिति। अत्यन्तलयाभावेन पुनः पुनरुत्पत्तिविनाशावापद्यते अत्यन्तलये पुनः तौ न स्याता-मिति ॥ २२ ॥

वेदान्तार्थावगतिना श्रीमता माधवेन च।
कपिलेर्मतमाख्याय तत्सूत्रं विवृतं मया ॥

इति श्रीवेदान्तवागीश—श्रीहरिहरात्मजेन परमहंसाचार्य्य-माधवपरिव्राजकेन विरचितं कापिल-सूत्रविवरणं समाप्तम्।

KARNATAKA SA